This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशाय नमः 3307

॥ श्रीगणेश

श्रीगणेशाय नमः

॥ श्रीगणेशाय नमः

श्रीगणेशाय नमः

श्रीगणेशाय नमः

Acc. No. ~~3307~~ M-1596

Title - रघुवंश

Author - कालिदास.

Date - ?

Subject - काव्य.

folio - 33

Xerox - 65

K K S U LIBRARY
RAMTEK
441 106
M-1596
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१॥ ॥श्रीगणेशाय नमः॥ ॥अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्यां॥वनाय पीतप्रति
बद्धवत्सां यशोधनो धेनुमृषेर्मुमोच॥१॥तस्याः खु
रन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त
नीया॥मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृ
तिरन्वगच्छत्॥२॥निवर्त्य राजा दयितां दयालुस्तां
सौरभेयीं सुरभिर्यशोभिः॥पयोधरीभूतचतुःस
मुद्रां जुगोप गोरूपधरामिवोर्वीं॥३॥व्रताय ते ॥२॥

सुरभिर्यशोभिः ॥१॥ पयोधरीभूतचतुःसमुद्रं
जुगोपगोरूपधरामिवोर्वी ॥२॥ व्रताय तेनानु
चरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि म
नोः प्रसूतिः ॥४॥ आस्वादवद्भिः कवलैस्तृ
णानां कण्डूयनैर्दंशनिवारणैश्च ॥ अव्याहतैः स्वैर
गतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥५॥ स्थि
तः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ न्धधीरः॥जलाभिलाषीजलमाददानांछायेवतां
भूपतिरन्वगच्छत्॥६॥सन्यस्तचिह्नामपिराजल
क्ष्मींतेजोविशेषानुमितांदधानः॥आसीदनावि
ष्कृतदानराजिरन्तर्मदावस्थइवद्विपेन्द्रः॥७॥ल
ताप्रतानोद्ग्रथितैःसकेशैरधिज्यधन्वाविचचारदा
वं॥रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्य
न्निवदुष्टसत्वान्॥८॥विसृष्टपार्श्वानुचरस्य २
तस्यपार्श्वद्रुमाःपाशभृतासमस्य॥उदीरया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासुरिवोन्मदनामालोकेशब्दुंवपसांविरावैः॥८॥
मरुत्स्रयुक्तोश्चमरुत्सखाभंतमर्च्यमारादभि
वर्त्तमानं॥ मस्रवाकिरन्वाललताःप्रसूनैराचारा
लाजैरिवपौरकन्याः॥१०॥ धनुर्भृतोप्यस्यदयार्द्रभा
वमाख्यातमंतःकरणैर्विशंकैः॥ विलोकयन्त्यो
वपुरापुरक्ष्णांप्रकामविस्तारफलंहरिण्यः॥११॥
सकीचकैर्मारुतपूर्णरंध्रैःकूजद्भिरापादितवं
शकृत्यं॥ शुश्रावकुंजेषुयशःस्वमुच्चैरुद्गीयमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंवनदेवताभिः॥१२॥पृस्नौस्नाःपारेगिरित्रिदूर्र
३ रागमनोकुहाकंपनपुष्पगन्धिः॥तृमातपक्लां
तमनातपत्रमाचारपूतंपवनैःसिषेवे॥१३॥श
शामद्रष्ट्वाविविनाद्वागिनरासीहुरो[illegible]स्फेकं
पुष्पवृष्टिः॥तुनंनसान्त्वेपश्चिकोववाधेतस्मिंचें
नंगोमहिगाहमाने॥१४॥संचारपूतानिदिग
न्तराणिकृत्वादिनान्तेनिलयायगन्तुं॥प्रचक्र ३
मेपल्ल[illegible]रागताम्राप्राचीपतं[illegible]डुःस्वमुनेश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनुः॥१५॥ तां देवतापितृतिथिक्रियार्थामन्वग्य
यौ मध्यमलोकपलः॥ बभौ च सा तेन सतां मते
न श्रद्धेव साक्षाद्विधिनोपपन्ना॥१६॥ स पल्वलोत्ती
र्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि॥ य
यौ मृगाध्यासितशाद्वलानि श्यामायमानानि
वनानि पश्यन्॥१७॥ आपीनभारोद्वहनप्रयत्ना
द्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः॥ उभावलंचक्रतुरं

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खिताभ्यां तपोवनाद्वत्तिपथं गताभ्यां ॥१८॥ व
शिशृण्वेनोरनुयाप्यिनंत स्नावर्त्तमानं वनितावन
४ न्तात ॥ पपौनि मेषाल सपक्ष पङ्क्तिः रुपोषिता
भ्या मिवलोचनाभ्यां ॥१९॥ पुरस्कृता वर्त्मनि पा ४
र्थिवेन [redacted] प्रत्युद्गता पार्थिवधर्मपत्न्या ॥
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या
॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा
साक्षतपात्रहस्ता ॥ प्रणम्य चानर्च विशालमस्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थं गांतरं द्वारमिवार्थसिद्धेः ॥२१॥ वत्सोत्सुकापि
स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ ॥
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि
पुरःफलानि ॥२२॥ गुरोः सदारस्य निपीड्य पा
दौ समाप्य सांध्यं च विधिं दिलीपः ॥ दोहावसा
ने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्नि
षण्णां ॥२३॥ तामंतिकन्यस्तबलिप्रदीपामन्वास्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्ता गृहिण्या सहायः॥ क्रमेण सुप्तामनु सं
विवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥२४॥ इत्थं
५ व्रतं पालयतः प्रजार्थं समं महिष्या महनीय
कीर्त्तेः॥ सप्त व्यतीयुस्त्रिगुणानि तस्य दिना
नि दीनोद्धरणोचितस्य॥२५॥ अन्येद्युरात्मानु
चरस्य भावं जिज्ञासमाना मुनिहोमधेनुः॥ गंगा ५
प्रपातांतनिरूढशष्पं गौरीगुरोर्गह्वरमाविवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॥२६॥सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्र
हितेक्षणेन॥ अलक्षिताभ्युत्पतनो नृपेण प्रसह्य
सिंहः किल तां चकर्ष॥२७॥ तदीयमाक्रन्दितमार्त्त
साधोर्गुहानिबद्धप्रतिशब्ददीर्घं॥ रश्मिष्विवाद
याय नगेन्द्रसक्तां निवर्त्तयामास नृपस्य दृष्टिं॥२८॥
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं
ददर्श॥ अधित्यकायामिव धातुमय्यां लोध्र

६ द्रुमं सानुमतः प्रफुल्लं ॥२९॥ ततो मृगेन्द्रस्य मृगेन्-
द्रगामी वधाय वध्यस्य शरं शरण्यः ॥ जाताभि-
षंगो नृपतिर्निषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥३०॥
वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे ॥
सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवावतस्थे
॥३१॥ बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमाग-
स्कृतमस्पृशद्भिः ॥ राजा स्वतेजोभिरदह्यतांतर्भो- ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीव मंत्रौषधिरुद्धवीर्यः ॥३२॥ तमार्यगृह्यं नि
गृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं ॥ विस्मापय
न्विस्मितमात्मवृत्तौ सिंहोरुसत्वं निजगाद सिंहः
॥३३॥ अलं महीपाल तव श्रमेण प्रयुक्तमप्य
स्त्रमितो वृथा स्यात् ॥ न पादपोन्मूलनशक्ति
रंहः शिलोच्चये मूर्छति मारुतस्य ॥३४॥ कैलास
गौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवेहि मां किंकरमष्टमूर्तैः कुंभोदरं नाम निकुंभ
तुल्यं ॥३५॥ अमुं पुरः पश्यसि देवदारुं पुत्रीकृतो
सौ वृषभध्वजेन ॥ यो हेमकुंभस्तननिस्सृतानां
स्कंदस्य मातुः पयसां रसज्ञः ॥३६॥ कंडूयमानेन क
टं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ॥ अथैनम
द्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥३७॥
तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रिकुंजे ॥ व्यापारितः शूलभृता विधाय सिंहत्वमंका
गतसत्ववृत्ति ॥ ३८ ॥ तस्यालमेषा क्षुधितस्य तृ
प्त्यै प्रदिष्टकाला परमेश्वरेण ॥ उपस्थिता शोणि
तपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥ ३९ ॥
स त्वं निवर्त्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्य
भक्तिः ॥ शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः श
स्त्रभृतां क्षिणोति ॥ ४० ॥ इति प्रगल्भं पुरुषा[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिराजो मृगाधिराजस्य वचो निशम्य॥ प्रत्याहता
स्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार॥४१॥
वी प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभंगे वितथप्रयत्नः॥
जडीकृतस्त्र्यंबकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपा
णिः॥४२॥ संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचः स
द्यदहं विवक्षुः॥ अन्तर्गतं प्राणभृतां हि वेद सर्वं भवा ८
८ न्भावमतोऽभिधास्ये॥४३॥ मान्यः स मे स्थावरजंगमा
नां सर्गस्थितिः प्रत्यवहारहेतुः॥ गुरोरपीदं धन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहिताजातेर्नस्यसुरस्तादनुपेक्षणीयं॥४४॥स
त्वंमदीयेनशरीरवृत्तिंदेहेननिर्वर्त्तयितुंप्रसीद॥दि
नावसानोत्सुकबालवत्सोविसृज्यतांधेनुरियंमह
र्षेः॥४५॥अथांधकारंगिरिगह्वराणांदंष्ट्रामयू
खैःशकलानिकुर्वन्॥भूयःसभूतेश्वरपार्श्ववर्त्तीकिं
चिद्विहस्यार्थपतिंबभाषे॥४६॥एकातपत्रंजगतःप्रभु
त्वंनवंवयःकांतमिदंवपुश्च॥अल्पस्यहेतोर्बहुहातुमि
च्छन्विचारमूढःप्रतिभासिमेत्वं॥४७॥भूतानुकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पातवचेदियंगौरेकाभवेस्वस्तिमतीत्वदन्ते॥जीवन्पु
नःशश्वदुपप्लवेभ्यःप्रजाःप्रजानाथपितेवपासि॥४८॥
अथैकधेनोरपराधचंडाद्गुरोःकृशानुप्रतिमाद्बिभे
षि॥शक्योस्यमन्युर्भवताविनेतुंगाःकोटिशःस्प
र्शयताघटोध्नीः॥४९॥तद्रक्षकल्याणपरंपराणां १८
भोक्तारमूर्जस्वलमात्मदेहं॥महीतलस्पर्शनमा १८
त्रभिन्नमृद्धंहिराज्यंपदमैन्द्रमाहुः॥५०॥एताव
दुक्त्वाविरतेमृगेन्द्रेप्रतिस्वनेनास्यगुहागतेन॥५१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थम
भाषतेव ॥५१॥ निशम्य देवानुचरस्य वाचं मनुष्य
देवः पुनरप्युवाच ॥ धेन्वा तदध्यासितकातराक्ष्या
निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥ क्षतात्किल
त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ॥ राज्ये
न किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसै
र्वा ॥५३॥ कथं नु शक्यो नुनयो महर्षेर्विश्राण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नादस्य पयस्विनीनां ॥५३॥ मामनूनां सुरभेरवेहि रुद्रौज
सा तु प्रहृतं त्वदपास्यां ॥५४॥ सेवं स देहार्पणनिष्क्र
येणान्याप्याम यां मोचयितुं भवन्तः ॥ नेपादरणस्या
द्धि हृतातवैवं भवेदल्पस्य च मुनेः क्रियार्थः ॥५५॥
भवानपीदं परवानवैति महान् हि यत्नस्तव देवदा १०
१० रौ ॥ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं
स्वयमक्षतेन ॥५६॥ किमप्यहिंस्यस्तव चेन्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोहं यशः शरीरं भव मे मोदयात्तु ॥ एकांतविध्वंसि
षु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ॥५७॥
संबन्धमाभाषणपूर्वमाहुर्जातः स नौ संगतयो
र्वनांते ॥ तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे
प्रणयं विहंतुं ॥५८॥ तथेति गामुक्तवते दिलीपः
सद्यः प्रतिष्टंभविमुक्तबाहुः ॥ संन्यस्तशस्त्रो हरये
स्वदेहमुपानयत्पिंडमिवामिषस्य ॥५९॥ तस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्क्षणेपालयितुः प्रजानामुत्पश्यतः सिंहनिपात
मुग्रं ॥ अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात वि
द्याधरहस्तमुक्ता ॥ ६० ॥ उत्तिष्ठवत्सेत्यमृतायमानं
वचोनिशम्योत्थितमुत्थितः सन् ॥ ददर्श राजा
११ जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ॥ ६१ ॥
तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य प
रिक्षितोसि ॥ ऋषिप्रभावान्मयि नांतकोपि प्रभुः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रहर्तुं किमुतास्त्रहिंस्राः ॥६२॥ भक्त्या गुरौ मय्यनुकंप
या च प्रीतास्मि ते पुत्र वरं वृणीष्व ॥ न केवलानां पयसां
प्रसूतिमवेहि मां कामदुघां प्रसन्नां ॥६३॥ ततः समानी
पसमानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ॥ वंशस्य
कर्त्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे ॥६४॥
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्वि
नी सा ॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति त

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मादिदेश॥६५॥वत्सस्य होमार्थविधेश्च शेषमृषेरनु
ज्ञामधिगम्य मातः॥औधस्यमिच्छामि तवोपभोक्तुं ष
ष्ठांशमुर्व्या इव रक्षितायाः॥६६॥इत्थं क्षितीशेन वशि
ष्ठधेनुर्विज्ञापिता प्रीततरा बभूव॥तदन्विता हैमव
ताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण॥६७॥तस्याः प्र
सन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य॥प्र
१२ हर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव॥६८॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा नंदिनी स्तन्यमनिंदितात्मा सद्वत्सलो वत्सहुतावशेषं॥
पपौ वशिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृ
ष्णः॥६९॥ प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं
स्वस्त्ययनं प्रयुज्य॥ तौ दंपती स्वां प्रति राजधानीं
संप्रेषयामास वशी वशिष्ठः॥७०॥ प्रदक्षिणीकृत्य
हुतं हुताशमनंतरं भर्तुररुंधतीं च॥ धेनुं सवत्सां च
नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः॥७१॥ श्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आमिरामध्वनिनारथेन सधर्मपत्नीसहितः सहिष्णुः ॥
ययावनुद्धातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥
तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिता
गं ॥ नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौ
१३ षधीनां ॥७३॥ पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौ
रैरभिनन्द्यमानः ॥ भुजे भुजङ्गेन्द्रसमानसारे भूयः
स भूमेर्धुरमाससञ्ज ॥७४॥ अथ ननयनसमु १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनि ॥१२
ष्ठ्यूतमैशं ॥ नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥७५॥
इति रघुवंशे महाकाव्ये कालिदासकृतौ नंदि
नीवरप्रदानं नाम द्वितीयः सर्गः ॥२॥ ५५५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वि
क्षणकौमुदीमुखं॥ निदानमिक्ष्वाकुकुल
स्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ॥१॥
शरीरसादादसमग्रभूषणा मुखेन सालक्ष्य
त लोध्रपांडुना॥ तनुप्रकाशेन विचेयता
रकाप्रभातकल्पा शशिनेव शर्वरी॥२॥
तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्रा १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितको
शजातं ॥ उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे
वरतंतुशिष्यः ॥ १ ॥ स मृन्मये वीतहिरण्मयत्वात्पा
त्रे निधायार्घ्यमनर्घ्यशीलः ॥ श्रुतप्रकाशं यशसा प्रका
शः प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥ तमर्चयित्वा वि
धिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ॥
विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाच ॥ ३ ॥ अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कु
शली गुरुस्ते ॥ यतस्त्वया ज्ञानमशेषमाप्तं चेतन्यमुष्णा
दिव दीधितेन ॥ ४ ॥ कायेन वाचा मनसापि शश्वद्
ज्जिरणो धैर्य्यविलोपितसं ॥ आपाद्यते न व्ययमंतरा
यैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५ ॥ आधारबंध
प्रमुखैः प्रयत्नैः संवर्द्धितानां सुतनिर्विशेषं ॥ कच्चिन्न
वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानां ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ॥
तदंकशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥
७॥ निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापांजलयः पि
तॄणां ॥ तान्युंछषष्ठांकितसैकतानि शिवानि व
स्तीर्थजलानि कच्चित् ॥ ८ ॥ नीवारपाकादि कडंगरीयै
रामृश्यते जानपदैर्न कच्चित् ॥ कालोपपन्नातिथिक
ल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥ अपि प्रसन्ने
न महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ॥ कालो ह्य

विधामुपदिश्य ह्ययं संक्रमितुं

[illegible]

31

२ श्र ... मात्रेण ... आश्रमाणां उपकारे क्षमं ... परं ... नीयं

यं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥ तवा-

र्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ॥ अप्या-

ज्ञया शासितुरात्मना वा प्राप्तोसि संभावयितुं वनान्मां ॥

॥११॥ इति सार्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां

निशम्य ॥ स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्व-

रतन्तुशिष्यः ॥१२॥ सर्वत्र नो वार्त्तमवेहि राजन्नाथे

कुतस्त्वय्यशुभं प्रजानां ॥ सूर्ये तपत्यावरणाय दृष्टेः क-

वार्त्तं फल्गुन्यरोगे चेत्समरः । वार्त्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयं इति

५ कर्णो नोः उत्पलताकर्णभरणतां मुहूर्तं

ववर्त्त मानमन्योन्यसंसक्तमहस्त्रियामं ॥ ७९ ॥ नितंबगुर्वी
गुरुणा प्रयुक्ता वधूर्विधात्[illegible]प्रतिमेन तेन ॥ चकार सा मत्त
चकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ॥ ८० ॥ हविः शमी
पल्लवलाजगंधिः पुण्यः कृशानोरुदियाय धूमः ॥ कपोल
संसर्पिशिखः स तस्या मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥ ८१ ॥ तदं
जनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं ॥ वधूमुखं
पाटलगंडलेखमाचारधूमग्रहणा[illegible]द्बभूव ॥ ८२ ॥ तौ स्ना

कपोलयोः संसर्पितुं शीलं यस्याः सा कपोलसंसर्पिणी कपोलसंसर्पिणी शिखा यस्य

कर्णो त्पलता ं

द्योपदिष्टा नकादिभिः प्रयुक्तं क्षिप्तेऽस्त्रार्द्राक्षतारोपरसंभ्रमूल । प्रतुपथ्यान् नौ कन्याकुमारौ कनकास

नेकै [redacted] बन्धुमता चरणापुरं घ्निभिश्चक्रमथाः प्रयुक्तं ॥ कन्या नस्थोऽ मूलामि तियोज ना कार्या २

कुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां ॥ २८ ॥ इति

स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ॥ महीपती

१५ नां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥ ३० ॥ लिंगैर्मुदः

संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः ॥ वैदर्भमामंत्र्य

ययुस्तदीयां प्रत्यर्प्य पूजामुपदाछलेन ॥ ३१ ॥ स तत्पिता क्र १५

थकैशिकानामनुष्ठितानंतरजाविवाहः ॥ सत्वानुरूपाभरणी २९

कृतश्रीः प्राप्यायुपपद्रायवमन्वगाच्च ॥ ३२ ॥ त्रिसत्त्विलोकीप

१ भयाणांलोकानांसमाहारस्त्रिलोकीनस्यां प्राधिमेन

34

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्रराग्गंच्छवनम्रन्येषुमौलिषु॥८४॥सविश्वजितमाहरे[redacted]नेयज्ञंस
र्वस्वदक्षिणां॥आदानंहिविसर्गायसतांवारिमुचामिवा॥८६॥सत्त्वां
तेसचिवसखःपुरस्क्रियाभिर्गुर्विभिः॥शमितपराजयव्यलीकान्॥
[redacted]काकु[redacted]स्थश्चि
रविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने॥८७॥तेरेखा
ध्वजकुलिशातपत्रचिह्नंसम्राजश्चरणयुगंप्रसादलभ्यं॥प्रस्थाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व १

श्रु

प्रणति निरकुल्वीपुवकुमौलिर्क्च्युतमकरंदरेणुगौरं ॥८४॥ यज्ञांते
तमवभृतानिषुकृतसत्कारैः शमितपराजयव्यलीकान् । स्वामभ्यो
त्सुकवनितान्निर्विदिस्तृणास्वानि स्वान्यवनिभुजः पुराणि नमुः ॥८५॥
॥ ॥इति श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृतौ दिग्विजयो नाम
चतुर्थः सर्गः॥ ॥तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोश
जातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतंतुशिष्यः॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

... विघ्नं जितिरिन्द्रिय तीर्थानि शेषविश्रा ... तको ... तां। तपा नीवेद्यो गुरुस्व
किरणधी कोल प्रपदं वरतं तृष्णाप ... सम ... देवीनां ... त्मप वात्मा ने निध्यापी ... प्रीत ...

समस्मयेवीतहिरण्मयत्वात्पात्रेनिधायार्घ्य[illegible] मनर्घ्यशीलः॥श्रु
तप्रकाशंयशसाप्रकाशः प्रत्युज्जगामातिथिमातिथेयः॥तमर्च
यित्वाविधिवद्विधिज्ञस्तपोधनंमानधनाग्रयायी॥विशांपतिर्विष्ट
रभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच॥अप्यग्रणीर्मन्त्रकृ
तामृषीणां कुशाग्रबुद्धे कुशलीगुरुस्ते॥ यतस्त्वयाज्ञानमशेषमाप्तं
चैतन्यमुष्णादिवदीधितेना॥४॥कायेनवावामनसा[illegible]श्वद्दुरितो
पि त्य

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संचितं १ ना २

यैर्पवित्रो पितृणा आपाद्यते न व्ययमंतरायैः केचिन्महर्षेस्त्विवि

धं तपस्तन्वापम आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धितास्तु नानि [illegible] विशे

षं [illegible] केचिन्नवाधारिरूपल्लवोदः श्रमच्छिदामाश्रमपादपानां [illegible] पा

क्रियानिमित्ते [illegible] ष्वपि वत्सलत्वादभग्नकामाः मुनिभिः कुशेषु नदंशु कु

चात्ययमुनाभिनात्वा केचिन्मृगीणामनघाः प्रसूतिः। निर्वर्त्यते ।। अ

१ तीर्थजलैः यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितृणां। तान्युद्धृतपंका पा २

१ तीर्थजलैस्तु

प्रकीर्णोद्धृत निष्पादते

धोन्मजे

कल्याणायुक्तानि

ऽऽतसेकृतानि ञ्जिवानि वन्तीर्थजलानि कच्चित् [illegible] वारुपाकादि

नमन्नमने किं कोऽऽशरीये राम् ह्यंयतेजानप देर्नवचित् कालोपपन्नातिथि कल्प्य

भागं वन्यं शरीरस्थितिसाधनं वः॥२॥ अपि प्रसन्नेन महर्षिणा त्वं सम्य ह

ग्विनीयानुमतो गृहाय। कालोह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्ष

ममाश्रमं ते॥णतवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रियायोत्सुकं

प्या१ मे॥ अप्याज्ञया शासितुरात्मना वा प्राप्तोसि संभावयितुं वनान्मां॥११॥

ना१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि-स्य २१ ।

स्यार्घपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ॥ स्वार्थोपपत्तिं प्रति दु
र्बलाशस्तमित्यवोचद्वरतंतुशिष्यः ॥१२॥ सर्वत्र नो वार्तमवेहि राजन्ना
थे कुतस्त्वय्यशुभं प्रजानां ॥ सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं त ली॰ २
मिस्रा ॥१३॥ भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयाति ॥श्री॥
शेषे ॥ व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥१४॥ ॥३२॥
शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ॥ आरण्यकोप

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः ॥१५॥ स्थाने भवानेकनराधि
पः सन्नकिंचनत्वं मखजं व्यनक्ति ॥ पर्यायपीतस्य सुरैर्हिमांशोः कलाक्ष
यः श्लाघ्यतरो हि वृद्धेः ॥१६॥ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं य
तिष्ये ॥ स्वस्त्यस्तु ते निर्गलितांबुगर्भं शरद्घनं नार्दति चातकोपि ॥१७॥ एता
वदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ॥ किं वस्तु विद्वन्गुरवे
प्रदेयं त्वया कियद्वेति तमन्वयुंक्त ॥१८॥ ततो यथावद्विहिताध्वराय तस्मै स्म
यावेशविवर्जिताय ॥ वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥

41

K K S U LIBRARY
RAMTEK
441 106
M-1596
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै॥ स मे चिरायास्ख-
लितोपचारां तां भक्तिमेवागणयत्पुरस्तात्॥२०॥ निर्बंधसंजातरुषार्थ- वि.स्त
कार्श्यमचिंतयित्वा गुरुणाहमुक्तः॥ वित्तस्य विद्यापरिसंख्यया मे को-
टीश्चतस्रो दश चाहरेति॥२१॥ सोऽहं सपर्याविधिभाजनेन मत्वा भवंतं प्र-
भुशब्दशेषं॥ अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य॥ ॥श्री॥
२२॥ इत्थं द्विजेन द्विजराजकांतिरावेदितो वेदविदां वरेण॥ एनोनिवृत्तेंद्रि- ॥४०॥
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्वृत्तिरेनं जगाद भूयो जगदेकनाथः॥२३॥ गुर्वर्थमर्थी श्रुतपारदृश्वा॥ रघोः
सकाशादनवाप्य कामं॥ गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवाव
तारः॥२४॥ स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोग्निरिवाग्न्यगारे॥ द्वि
त्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थं॥२५॥ तथेति
तस्याविनथां प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा॥ गामात्तसारां रघुरप्य
वेक्ष्य निःकृष्टुमर्थं चकमे कुबेरात्॥२६॥ वसिष्ठमंत्रोक्षणजात्प्रभावा

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुदन्वतः काशमहीधरेषु॥ मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने नहि
तद्रथस्या॥२७॥ अथाधिशिय्य प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं।
सामंतसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः॥२८॥ प्रातः प्रयाणा
भिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः॥ हिरण्मयीं कोशगृहस्य
मध्ये वृष्टिं शशंसुः पतितां नभस्तः॥२९॥ तं भूपतिर्भासुरहेमराशिं ल ॥ श्री ॥
ब्धं कुबेरादभियास्यमानात्॥ दिदेश कौत्साय समस्तमेव पादं सुमेरोरि ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्र
ववर्ज्जिनं ॥३०॥ जनस्यसाकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यसत्वौ ।
गुरुप्रदेयाधिकनिस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ॥३१॥ अथोष्ट्रवा
मीशतवाहितार्थं प्रजेश्वरं प्रीतमनामनीषी ॥ स्पृशन्करेणानतपूर्वकायं सप्र
वाचमु स्थितोवाचकौत्सः ॥३२॥ किमत्रचित्रं यदिकामसूर्भूर्वृत्तेस्थितस्याधिपतेःप्र
जानां ॥ अचिंतनीयस्तुतवप्रभावो मनीषितं घोरपियेनदुग्धा ॥३३॥ आशा
स्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ॥ पुत्रंलभस्वात्मगुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सु

द्रूपंनवतमीप्सोनवतःपितेव॥२४॥इत्थंप्रयुज्याशिषमग्रजन्माराज्ञेप्रती
यायगुरोःसकाशं॥राजापिलेभेसुतमाशुतस्मादालोकमर्कादिवजीव
लोकः॥२५॥ब्राह्मेमुहूर्तेकिलतस्यदेवीकुमारकल्पंसुषुवेकुमारं॥अ
तःपिताब्रह्मणएवनाम्नातमात्मजन्मानमजंचकार॥२६॥रूपंतदोजस्वि
तदेववीर्यंतदेवनैसर्गिकमुन्नतत्वं॥नकारणात्स्वाद्बिभिदेकुमारःप्रवर्त्ति
तोदीपइवप्रदीपात्॥२७॥उपात्तविद्यंविधिवद्गुरुभ्यःस्तंयौवनोद्भेदविशेष ६

मान्तम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वांते॥श्री गंतुकामा पितुरोरनुज्ञां धीरेव कन्या पितुराव कांक्षा॥३८॥अथे
श्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिंदुमत्याः॥आप्तः कुमारानयनो
त्सुकेन भोजेन दूतो रघवे विसृष्टः॥३९॥तं श्लाघ्यसंबंधमसौ विचिंत्य दार
क्रियायोग्यदशं च पुत्रं॥प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराज
धानीं॥४०॥तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः॥मार्गे नि
वासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः॥४१॥स नर्मदारोधसि सीकरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करैव

ईर्मरुद्भिरानर्तितनक्तमाले॥ निवेशयामास विलंघिताध्वा क्लांतं रजो धूसरकेतु तु
सैन्यं॥४२॥ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतःसलिलप्रवेशः॥ निर्धौतदाना
मलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज॥४३॥ निःशेषविक्षालितधातुनापि
वप्रक्रियामृक्षवतस्तटेषु॥ नीलोर्ध्वरेखाशबलेन शंसन् दंतद्वयेनाश्मविकुं
ठितेन॥४४॥ संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं॥ बभौ स भिं
दन्बृहतस्तरंगान्वार्यर्गलाभंग इव प्रवृत्तः॥४५॥ शैलोपमः शैवलमंजरी

कुम

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णो जालानि कर्षन्नुरसा स पश्चात्॥ पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्त
टमुत्ससर्प॥४६॥ तस्यैकनागस्य कपोलभित्योर्जलावगाहक्षणमात्रशांता जं०का०२
॥ वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः॥४७॥ सप्तच्छदक्षीरकटु
प्रवाहमसह्यमाघ्राय मदं तदीयं॥ विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा वि
मुखाः प्रवृत्तुः॥४८॥ स च्छिन्नबंधद्रुतयुग्मशून्यं भग्नाक्षपर्यस्तरथं क्षणे
न॥ रामापरित्राता विहस्तयोधं सेनानिवेशं तुमुलं चकार॥४९॥ तमापतंतं नृप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेरवध्यो वन्यः करीति श्रुतवान्कुमारः॥ निवर्तयिष्यन्विशिखे
पा२ न कुंभे जघान नात्यायतकृष्टचापः॥५०॥ स विद्धमात्रः किल ना
गरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः॥ स्फुरत्प्रभामंडलमध्यवर्ती कां
तं वपुर्व्योमचरं प्रपेदे॥५१॥ अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थै
रवकीर्य पुष्पैः॥ उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोरस्थलता
रहारः॥५२॥ मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवेहि गंधर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥५३॥ स चा
नुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगछत् ॥ उष्णत्वमग्न्या
तपसंप्रयोगाछैत्यं हि यत्सा प्रकृतिर्जलस्य ॥५४॥ इक्ष्वाकुवं
शप्रभवो यदा ते भेत्स्यत्यजः कुंभमयो मुखेन ॥ संयोक्ष्यसे
स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्मां ॥५५॥ संमोचितः
सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ॥ प्रतिप्रियं चेद्भव

51

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनकुर्वीं तृष्णा हिमे त्वा स्त्वपरोपक्लांक्षि ॥५६॥ संमोहनंनामस
खे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं ॥ गांधर्वमाधत्स्वयतः प्र
स्व२ योक्तुर्नचारिहिंसाविजयश्चहस्ते ॥५७॥ अलंह्रियामांप्रति
यन्मुहूर्तंदयापरोभूः प्रहरन्नपित्वं ॥ तस्मादुपछंदयतिप्रयो
ज्यंमयित्वयानप्रतिषेधरौक्ष्यं ॥५८॥ तथेत्युपस्पृश्यपयः प ॥ ।
वित्रंसोमोद्भवायाः सरितोनृसोमः ॥ उदङ्मुखः सोस्त्रविदस्त्र ॥
६

त्रजया हतस्मान्निगृहीतरापात् ॥५९॥ एवं तयोरध्वनि दैवयोगादासेदु
षोः सख्यमचिंत्यहेतु ॥ एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो वि
दर्भान् ॥६०॥ तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः ॥ प्रत्यु
ज्जगाम क्रथकैशिकेंद्रश्चंद्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥६१॥ प्रवेश्य चै
नं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ॥ मेने यथा तत्र जनः समेतो
वैदर्भमागंतुमजं गृहेशं ॥६२॥ तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८२

रघु॰ १ द्वारवेदिविनिवेशितहेमकुंभां॥ रम्यां रघुप्रतिनिधिः स नवोपकार्यां

बाल्यात्परामिव दशां मनोध्युवास॥६३॥ तत्र स्वयंवरसमाहृतरा

जलोकं कन्याललाम कमनीयमजस्य लिप्सोः॥ भावावबोधकलुषा

दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव॥६४॥ तं कर्णभू ॥श्री॥

षणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशांगरागं॥ वैतालि ॥५६॥

काः ललितबंधमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः॥६५॥

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रिर्गतामतिमतांवरमुंच शय्यां धात्राद्विधैव ननु धूर्जगतोविभक्ता॥ या
२२ मेकतस्तव विभर्त्ति गुरुर्विनिद्रस्तस्याभवानपरधुर्यपदावलंबी॥ इहा
निद्रावशेन न वताप्यवेक्ष्यमाणा पर्युत्सुकत्वमबलानिशि खंडितेव॥
लक्ष्मीर्विनोदयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः॥
द्राग्दृशा तद्त्वमुनायुरा छुदसि॥ निमिषितो नू ननावहसघः परस्य रतुल्या
मधिरोहतोद्वा ... दमानं परस्पेतरतारमंतश्च वस्तुस्तवपक्ष्मणिभ्रमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपक्षे [illegible]॥ हंतस्वकथं हरति पुष्पमनोहरं कः नां संस्ष्यते सरसिजे सर

णां श्रुतिनिश्चैः॥ स्वाभाविकं परगुणेन विनाति वायुः सौरभ्यमीप्सुरिव ते

मुख मारुतस्य॥६९॥ तांम्रोदरेषु पतितं कुसुमपल्लवेषु निर्धौतहार[illegible]

कविशादहि मांसः॥ आनातिलक्ष्य परस्नागतया धरोष्ठे लीलास्मितं सद ॥श्री॥

शनां विरिरल दीपं॥७०॥ यावस्रतापनिधि[illegible]मतेन तानुरक्तायतापद

रुतौत मौनिरस्तां॥ आयोधनाय सरतो त्वयि वीर याते किं वारिपूरस्तव

न

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरुः स्वयमुछिनत्ति॥७१॥शय्यांजहत्युभयपक्षविनीतनिद्राःस्तंबेर
मामुखरशृंखलकर्षिणस्ते॥येषांविभांतितरुणारुणरागयोगाद्भिन्ना
द्रिगैरिकतटा इव दंतकोशाः॥७२॥दीर्घेष्वमीनियमिताःपटमंडपेषुनि
टा ३ द्रांविहायवनजाक्षवनायुदेश्याः॥वक्त्रोष्मणामलिनयंतिपुरोगतानि
हा ३ लेह्यानिसैंधवशिलाशकलानिवाहाः॥७३॥भवतिविरलभक्तिर्म्लानि
पुष्पोपहारःस्वकिरणपरिवेषोद्भेदशून्याःप्रदीपाः॥अयमपिचगिरं

॥ राम ॥

१९
२९

57

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

=वा

नरस्य मवोधप्युक्ताम्मनुवदति शुकस्ते मंजुवाक्पंजरस्थः ॥७४॥ इतिविर
चितवाग्भिर्वंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार ॥ मदपटु
निनदद्भिर्बोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ॥७५॥ अथवि
धिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमंचिताक्षिपक्ष्मा ॥ कुशलविरचि ५४
५२ तानुकूलवेषः क्षितिपसमाजमगात्स्वयंवरस्थं ॥७६॥ ॥इति श्रीरघुवंशेम
हाकाव्ये स्वयंवराभिगमनो नाम पंचमः सर्गः ॥ ॥५॥ तत्र मंचेषु मनोज्ञ

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल्के   नि   पार्थिव   स्नुषात्वेनस्वीकारात्

किं वीर्यशुल्कमभिनंद्य मैथिलः॥ राघवाय तनयामयोनिजां रूपिणीं श्रियमिवामरघृतिः ४७
प्राहिणोच्च महितं महाद्युतिः कोशलाधिपतये पुरोधसं भस्समाभाविदुहितुः प्रतिग्रहा
दिष्यतां कुलमिदं निमेरिति ४८ अन्विषेष सदृशीं च स स्नुषां प्राप चैनमनुकूलवाग्द्विजः
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि कांक्षितं ४० उ सुब श्व सुत दार कर्मणा सो
मुरसवा न [illegible] श्वतं ५० जौ तमस्पतनयोनुकूलवाक् प्रार्थितं हि सुकृताम कालहृत् ५१ त
ग्यान स्य कल्पित पुरस्क्रियाविधेः शुश्रुवान्वचनमग्रजन्मनः उच्चचाल मिहसयोपरेणमुच्वि बा
ताकदीधितिः ५२ आससाद मिथिलां स वेष्टयन्पीडितोपवनपादपैर्बलैः प्रीतिरोधमसहि
मैथिलः सदसि सत्संगरो राघवाय तनयामयोनिजां॥ संनिधौ घ लिमतस्तपो निधेरग्नि

[illegible]

र· म:

११

वृत्तापुत्रीरीत्स्त्रीव कान्तपरिभोगमायतं ५७ तौ समेत्य समयस्थितावुभौ भूपती वरुणवासवो
४५१ ख पमौ कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ५८ पार्थिवीमुदवहद्रघूद्वहो लक्ष्मण
स्तदनुजामथोर्मिलां यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ॥ ५९ ता नराधिप न रा
सुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थतां सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्नि
परिग्रहाः भः ५६ ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूसमागमात् ॥ सामदानविधिभेदविग्रहाः न
सिद्धिमन्त इव तस्य भूपतेः ५६ एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः अ
ध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ॥ ५८ तस्य जातु मरुतः प्रतीपगा वर्त्म
सु ध्वजतरुप्रमाथिनः चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीं ५९ लक्ष्यते
स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ६०

२

५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धूमेघा दृष्ट्या२ नो गं

शेपनपक्षपरिघ्घसरात्तकाः सौरुधिराद्रवासस[illegible] श्रृंगनाइवरजस्वलादिशो बभ्रुवलोकनोक्षमाः ६१
भास्करश्चदिशमध्युवास यां तांश्रिताः अतिभयं ववासिरे क्षत्रशोणितपितृक्रियोचितं बौरयंत्य इव मा
र्गवंशिवाः ६२ तस्मतीयवपेनादिवेलतं [illegible] प्रशांतिमधिवक्रस्य लक्ससविव अन्वयुंकगुरुमीश्वरः क्षिते
स्वंतमिस्यत्लघयस्सैघथां ६३ तेजसः सपदि राशिरुच्छ्रितः प्रादुरासकिलवाहिनीमुखे यः प्रमज्यन
यनानि सैनिकैर्लक्षितगीयपुरुषाकृतिश्चिरात् ६४ पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जि
तं दधत् यः ससोमइव घर्मदीधितिः सद्विजिह्व इव चंदनद्रुमः ६५ येन रोषपरुषात्मनः पितुः
शासने स्थितिभिदोपि तस्थुषा वेपमानजननीशिरश्छिदा प्राग्जीयत घृणा ततो मही ६६ अ
क्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंश्रितेन यः क्षत्रियांतकरणैकविंशतेर्व्याजपर्वगणनामि
वोद्वहन् ६७ तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितं बालसूनुरेवलोक्य भार्गवं स्थि

स्थांरश्लांचविकृसाद[illegible]

[illegible]संश्रितेनयः२

61

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०पु०वं०

व्यथेदशरथो दशाच्युतः ६८ नाम राम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे। हृद्यमस्य
भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ६९ अर्घ्यमर्घ्यमिति वादिनं नृपं सोनवेक्ष्य भ
रताग्रजो यतः ॥ क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकां ७० तेन कार्मुकनिषक्त
मुष्टिना राघवो विगतभीः पुरोगतः ॥ अंगुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ७१
क्षत्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः ॥ सुप्तसर्प इव दंडघट्टनादुद्धतोस्मि तव वि
क्रमश्रवात् ७२ मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षिणोः ॥ तन्निशम्य भवता समर्थये
वीर्यशृंगमिव भग्नमात्मनः ७३ अन्यदा जगति राम इत्ययं शब्द ईरित एव मामगात् ॥ व्रीडमा
वहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ७४ बिभ्रतोस्त्रमचलेप्यकुंठितं द्वौ रिपू मम मतौ स

५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तातधेनु

मागतो होमधेनुहरणाद्धहैहयस्त्वं चकीर्त्तिमपहर्तुमुद्यतः ७५ क्षत्रियांतकरणोपि विक्रमस्तेन मामवति
नाजिते त्वयि पावकस्य तु हि मास गन्यते ।। कक्षवत् ज्वलति सागरेपि यः ७६ विद्धि चांतरसमोज सा
र हरैश्वरं धनुर्भाजि जस्तया ।। खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमं ।। ७७ तन्मदीय
मिदमायुधं ज्ययासंगमय्य सशरं विकृष्यतां ।। तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया ७८
कातरोसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम ।। ज्यानिघातकठिनांगुलिर्वृथा वध्यतां
मभययाचिनांजलिः ७९ एवमुक्तवति भीमदर्शने भार्गवे स्मितविकंपिताधरः ।। तद्धनुर्ग्रहण
मेव राघवः प्रत्यपद्यत समर्थमुत्तरं ।। ८० पूर्वजन्मधनुषा समागतः सोतिमात्र[illegible]दर्शनो भवत् ।।
केवलोपि सुभगो नवांबुदः किं पुनस्त्रिदशचापलांछितः ।। ८१ ।। तेन भूमिनिहितैककोटि तत्
कार्मुकं च बलिनाधिरोपितं ।। प्रापवर्णविकृतिं च भार्गवो धूमशेष इव वासवध्वजः ८२ तावुभा
निरभसौ पुरास मस्तांध्रमशेवइवधूमकेतनः ८३

63

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावपिपरस्परे[illegible]तौवर्द्धमानपरिहीणतेजसौ ।। पश्यतिस्मजनतादिनात्यये पार्वणौशशिदि
वाकराविव ।। ८२ ।। तंकृपामृदुरवेक्ष्यभार्गवं राघवःस्खलितवीर्यमात्मनि । स्वंचसंहित[illegible]ममो
घमाशुगंव्याजहारहरसूनुसन्निभः ।। ८३ ।। नप्रहर्तुमलमस्मिनिर्दयंविप्रइत्यभिभवत्यपित्वयि ।
५३ शंसकिंगतिमनेनपत्रिणाहन्मिलोकमुतते मखार्जितं ।। ८४ ।। प्रत्युवाचतमृषिर्नतत्त्वतस्त्वांनवे
द्मिपुरुषंपुरातनं ।। गांगतस्यतववाममवैष्णवं कोपितोह्यसिमयादिदृक्षुणा ।। ८५ ।। भस्मसात्कृत भ
पात्र वतःपितृद्विषे.धि.म.साच्चवसुधासस्सागरा । आहितोजयविपर्ययोपिमेश्लाघ्यएवपरमेष्ठिनाच
या ।। ८६ ।। तद्गतिंमतिमतांवरेप्सितांपुण्यतीर्थगमनायरक्षमे । पीडयिष्यतिनमांखिलीकृता
ति स्वर्गपद्धतिरभोगलोलुपं ।। ८७ ।। प्रत्यपद्यततथेतिराघवः प्राङ्मुखश्चविससर्जसायकं ।। भार्ग
वस्यसुकृतोपिसोभवत्स्वर्गमार्गपरिघोदुरत्ययः ।। ८८ ।। राघवोथचरणौतपोनिधेःक्षम्य
४ श्रा। स्यएव श्रास्मि ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन तृप्तिमाययौ ।। करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलं ।।३।। द्रिवं मस्
त्वा निवमोक्ष्यते महीं दिगंतविश्रांतरथो हि
मस्तुतः ।। म्रतो मिलाषे प्रथमं तथाविधे मनो
बबंधान्यरसान्विलंघ्य सा ।।४।। न मे ह्रिया शंसति
किंचिदीप्सितं । स्पृहावती वस्तुषु केषु मागधी
इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरको

KKSU RAMTEK 441 106 M-1596 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.10.20 14:53
,TRANSFERRED=2020/10/17 at 15:02:43
,PAGES=65
,TYPE=STD
,NAME=S0004095
,Book Name=M-1596-RAGHUVANSH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection